This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2191 विषय काव्य

नाव रघुवंशम् द्वितीय सर्ग) MSS.

लेखक / लिपीकार महाकवि कालिदास रचितम्

पृष्ठ 20 काळ — पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रतायेति॥ व्रताय धेनोरनुचरेण न तु जीवनायेति भावः। तेन दिलीपेन शेषोऽव
शिष्टोऽप्यनुयायिवर्गः॥ अनुचरवर्गोऽन्यपेधि निवर्त्तितः। शेषत्वं सदक्षिणापेक्ष
या। कथं तर्हि आत्मरक्षणमत आह॥ न चेति तस्य दीलीपस्य शरीररक्षा च अन्य
तः। पुरुषांनकुतो हि यस्मात् कारणान्मतो॥ प्रसूयत इति प्रसूतिः संततिः स्ववीर्य

व्रतायतेनानुचरेण धेनोन्यषेधि शेषोप्यनुयायिवर्गः॥ न चान्यतस्तस्य श
रीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः॥४॥ आस्वादवद्भिः कवलैस्तृणा
नां कंडूयनैर्दंशनिवारणैश्च॥ अव्याहतैः स्वैरगतैः स तस्याः सम्राट् सम
राधनतत्परोऽभूत्॥ ॥५॥ ॥७॥ स्ववीर्यगुप्ता स्ववीर्येणैव रक्षिता॥

न हि स्वनिर्वाहकस्य परापेक्षेति भावः॥४॥ आस्वादवद्भिरिति॥ संम्राट् मंडलेश्व
रः। येनेष्टं राजसूयेन मंडलस्येश्वरश्च यः॥ शास्ति यश्चाज्ञया राज्ञः स सम्राडथ
राजकमित्यमरः॥ स राजा आस्वादवद्भिः स्वदमानैः स्वादुभिरित्यर्थः॥ तृणानां कव

२. द्वि. ३

लैः॥ ग्रासैः कंडूयनैः खर्जनैर्दंशानांवनेमाक्षिकाणांनिवारणैश्च॥ दृशस्तव
नमिक्षिपेत्स्मरः॥अव्याहतैरप्रतिहतैः स्वैरगतैः स्वच्छंदगमनैश्च॥ तस्याः धे
न्वाः समारोधनतत्परः शुश्रूषासक्तोऽभूत्॥तदेवंपरंप्रधानंयस्येतितत्परः त
त्परे प्रसितासक्ताविसमरः॥५॥ स्थितइति॥ भूपतिस्तांगांस्थितांसतीस्थितःसन्।
स्थितरूर्ध्वावस्थानं। प्रयातांप्रस्थितांउच्चलितः प्रस्थितः निषण्णादुपविष्टामित्यर्थः।

स्थितःस्थितामुच्चलितःप्रयातांनिषेदुषीमासनबंधधीरः॥
जलाभिलाषीजलमाददानांछायेवतांभूपतिरन्वगच्छत्॥६॥

भाषायांसदवसश्रुवइतिक्वसुप्रत्ययः॥उगितश्चेतिङीप्॥आसनबंधेउप ३
वेशनेधीरः॥स्थितः उपविष्टः सन्नित्यर्थः॥जलमाददानांपिबंतींजलाभिलाषीपिबं
नित्यर्थः॥ इत्थंछायेवान्वगत्॥ अनुसृतवान्॥६॥ ॥स इति॥ न्यस्तानि
परिहृतानिचिह्नानिछत्रचामरादीनियस्यास्तांतथाभूतामपितेजोविशेषेणा

भावातिशयेनअनुमितांसर्वथाराज्ञाएवाभंभवेदितिऊह्यतांराज्यलक्ष्मींदधानः
सराजअनाविष्कृतदानराजिः बहिरप्रकटीकृतमदरेखः अंतर्गतामदावस्थायस्यसत
थाभूतोद्विपेंद्रइवासीत्॥७॥लतेति॥लतानांवल्लीनांप्रतानैः कुटिलतंतुभिः उग्रथ
पि नग्रथितैः केशैरुपलक्षितः इत्थंभूतलक्षणेतृतीयासराजाअधिज्य

न्यस्तचिह्नामपिराजलक्ष्मींतेजोविशेषानुमितांदधानः॥आसीदनाविष्कृतदान ६
राजिरंतर्मदावस्थइवद्विपेंद्रः॥७॥लताप्रतानो[illegible]थितैः सकेशैरधिज्यधन्वावि द्रु २ थितैः
विचचाररदावं॥रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्निवदुष्टसत्वान्॥८॥

मारोपितमौर्विकंधनुर्यस्यसोऽधिज्यधन्वासन्॥धनुषश्चेत्यनङादेशः॥मुनिहोमधेनोः
रक्षापदेशात्रक्षाव्याजाद्वन्यान्वनेभवान्दुष्टसत्वान्दुष्टजंतून्॥इत्यसुव्यवसाये
षुसत्वमस्त्रीतुजंतुषुइत्यमरः॥विनेष्यन्शिक्षयिष्यन्निवदावंवनंविचचारवनेचूव
नन्हेचदवोदावइहेष्यतेरितियादवः॥वनेचचारेत्यर्थः॥देशकालाध्वगंतव्याकर्मसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰ द्वि॰ त्राद्यकर्मणामितिदायस्यकर्मत्वं ॥८॥ विसृष्टेत्यादिभिः षड्भिः श्लोकैः तस्यमहा
५ महिमतया द्रुमादयोपि राजोपचारं चक्रुरित्याह ॥ विसृष्टेति ॥ विसृष्टाः पार्श्वानुचराः पा
र्श्ववर्तिनो जना येन तस्य पाशभृता वरुणेन समस्य तुल्यस्यानुभावोनेन सूचितः ॥
तस्य राज्ञः पार्श्वयोः द्रुमाः उन्मदानां उत्कटमदानां वयसां खगानां ॥ खगबाल्यादिनो

विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य ॥ उदीरयामासुरिवो
न्मदानामालोकशब्दं वयसां विरावैः ॥९॥ मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमा
रादभिवर्तमानं ॥ अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः ॥१०॥

र्वय इत्यमरः ॥ विरावैरालोकस्य शब्दाचकं ॥ आलोकयेति शब्दमित्यर्थः ॥ ऊदीरयामास ५
रिव अयदन्नुप्रेक्षा ॥९॥ मरुदिति ॥ मरुत्प्रयुक्ताः वायुनाप्रेरिताः बाललताः आरात्स
मीपे आवर्तमानं ॥ आराद्दूरसमीपयोरित्यमरः ॥ मरुतः वायोः सखा मरुत्सखोग्निः
सइव भातीति मरुत्सखाभः ॥ अतश्चोपसर्गे कः इति कप्रत्ययः ॥ अर्च्यं पूज्यं तं दिलीपं

प्रसूनैः पुष्पैः पौरकन्याः पौराश्चताः कन्याः ॥ आचारार्थैः लाजैराचारलाजैरवाकिरन्नुत
स्योपरि निक्षिप्तवंत्य इत्यर्थः ॥ सखा हि सखायमागतमुपचरतीति भावः ॥ लाजाः पुंभू
म्नि चाक्षता इत्यमरः ॥ प्रसूनं कुसुमं सुममित्यमरः ॥१०॥ धनुर्भृत इति ॥ धनुर्भृतोप्यस्य
राज्ञः ॥ अनेन भयसंभावना दर्शिता तथापि विशंकैः निर्भयैः अंतःकरणैः कर्तृभिः द्य
या दयापारसेन आर्द्रो भावो अभिप्रायो यस्य तत् दयार्द्रभावं तदाख्यातं दयार्द्रभावेन रुद्धिया

धनुर्भृतोप्यस्य दयार्द्रभावमाख्यातमंतःकरणैर्विशंकैः ॥ विलो
कयंत्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ॥११॥ ॥

ख्यातमित्यर्थः ॥ भावः स्वभावाभिप्रायचेष्टात्मजन्मस्विति समरः ॥ तथाविधं वपुः वि
लोकयंत्यो हरिण्यः अक्ष्णां प्रकामविस्तारस्यात्यंतविशालतायाः फलमापुः विम
लं कलुषीवमञ्चचेतः प्रथयस्यैव हितेषपरिपुवेतिन्यायेन स्वांतःकरणाद्भक्तिं प्रा
माण्यादेव विश्व दृष्टुरित्यर्थः ॥११॥ सरति ॥ मारुतपूर्णरंध्रैः ॥ अतएव कु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰ चंटि॰
५

जङ्घिः स्वरवङ्घिः कीचकैर्वेणुविशेषैः। वेणवः कीचकास्ते स्युर्ये स्वनंत्यनिलोद्ध
ताः इत्यमरः। वंशः सुषिरवाद्यविशेषः॥ वंशादिकं तु सुषिरमित्यमरः। विशिष्ट्वा
चकानां सतिविशेष्यपरत्वं। उच्चैरापावृत्तं संपादितवान्‌ यशस्य लत्य कार्येनमितरूप
णितंतथा कुंजेषु लतागृहेषु॥ निकुंजकुंजौ वा क्लीवे लतादिपिहितोदरे इत्यमरः॥ वन

सकीचकैर्मारुतपूर्णरंध्रैः कूजद्भिरापादितवंशकृत्यं॥ शुश्राव
कुंजेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः॥ ३२॥ ॥

देवताभिः॥ उद्गीयमानं उच्चैर्गीयमानं स्वयशः शुश्राव श्रुतवान्॥ वाक्यं तु रस
रंध्रत्वेन स्वरजननयोग्यता परं रहितादीनां गजादिप्रयोगनियमो वा करिकलभा ५
दिवत्‌ उक्तदोषो नेति कश्चिद्वेणुमात्रेपि कीचकरसन्यः॥ ३२॥ ॥पृक्तइति। गि
रिषु निर्झराणां प्रवाहाणां प्रवाहो निर्झरो झर इत्यमरः॥ तुषारैः सीकरैः। तुषारैर्

हिमसीकरावितिशाश्वतः॥ पृक्तः संपृक्तः। अनोकहानां वृक्षाणां आकंपितानां पुष्पा
णां तेषां यो गंधः सोस्यास्तीति तथोक्तः॥ पुष्पगंधी ईषत्कंपितपुष्पगंधवान्‌। पवनो
वायुः अनातपत्रं छत्रतार्थे परिहृतछत्रं अत एव आतपक्लांतं आचारेण पूतं शुद्धं तं नृपं
सिषेवे। आचारपूतत्वात्‌ राजा गोत्वे यावनस्य पवनस्यापि सेव्य आसीदिति भावः॥ ३३॥
पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकंपितपुष्पगंधी॥ तमातपक्लांतमनातप
त्रमाचारपूतं पवनः सिषेवे॥ ३३॥ शशाम वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपु
ष्पवृद्धिः॥ ऊनं न सत्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि गाहमाने॥ ३४
शशामेति॥ गोप्तरि तस्मिन्राज्ञि वनं गाहमाने प्रविशति सति॥ वृष्ट्या विनापि दवाग्निर्वना
ग्निः दवदावौ वनानिलावित्यमरः॥ शशाम॥ फलानां पुष्पाणां च वृद्धिः विशिष्य
तइति विशेषः अतिशयिता आसीत्‌ कर्मार्थे लघुप्रत्ययः॥ सत्वेषु जंतुषु मध्ये। यतश्च
निर्धारणसप्तमी। अधिकः प्रबलो व्याघ्रादिः ऊनं दुर्बलं हरिण्यादिकं न बबाधे न पीडितवान्॥ ३४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰ वं॰ टी॰ ६

संचारपूतानीति ॥ पल्लवस्यरागोवर्णः पल्लवरागः रागोनुरक्तोमात्सर्येकुंशादौरोहितादि
प्रवृत्तिशाश्वतः सएवताम्रपल्लवरागतांम्रापतं ॥ स्यसूर्यस्यप्रभाकांतिः पतंगः पुंसि
सूर्ययोरितिशाश्वतः ॥ पुनश्चधेनुर्दिगंतराणिदिगवकाशान् ॥ अंतरमवकाशावधिइ
त्यमरः ॥ संचारेणपूतानिशुद्धानिकृत्वादिनांतेसायंकालेनिमोलेयअस्तमयायधेनु

संचारपूतानिदिगंतराणिकृत्वादिनांतेनिलयायगंतुं ॥ प्रचक्रमेपल्लवरागताम्रा
प्रभापतंगस्यमुनेश्चधेनुः ॥ १५ ॥ तांदेवतापित्रतिथिक्रियार्थामन्वग्ययौमध्य
मलोकपालः ॥ बभौचसातेनसतांमतेनश्रद्धेवसाक्षाद्विधिनोपपन्ना ॥ १६ ॥

धेनुः अलयायचरंगंतुंप्रचक्रमे ॥ १५ ॥ तामिति ॥ मध्यमलोकपालः भूपालः देवतापित्रति
थीनांक्रियाः यागश्राद्धदानानिताएवार्थः प्रयोजनंयस्यास्तांधेनुं अन्वक्अनुपदंययौ ॥ स
तांमतेनसद्भिर्मान्येन । गतिबुद्धीत्यादिनावर्तमानेक्तः कर्तस्यचवर्तमानेइतिषष्ठी । तेनराज्ञाउ
पपन्नायुक्तासाधेनुः सतांमतेनविधिनाअनुष्ठानेनउपपन्नासाक्षात्प्रत्यक्षागुरुदेवशास्त्रे

धीसहायः पत्नीद्वितीयः सन्उभावपीत्यर्थः ॥ अंतिकेन्यस्तावलयः प्रदीपाश्चयस्तांत
थोक्तांपूर्वोक्तांनिषण्णांधेनुंअन्वास्यअनुपविश्यक्रमेणसुप्तामनुअनंतरंसंविवेशसुप्त
पप्रातः सुप्तोत्थितांअनूदतिष्ठनूउत्थितवान् ॥ आभानुशब्देनधेनुराजव्यापारयोः पौर्वा
पर्यमुच्यते ॥ क्रमशब्देनधेनुव्यापाराणामिति ॥ अपौनरुक्त्यं ॥ कर्मप्रवचनीययुक्तेतिद्वि

तामंतिकन्यस्तबलिप्रदीपामन्वास्यगोप्तागृहिणीसहायः ॥ क्रमेणसुप्तामनुसंविवे
शसुप्तोत्थितांप्रातरनूदतिष्ठत् ॥ २४ ॥ इत्थंव्रतंपालयतःप्रजार्थंसमंमहिष्यामहनीयकीर्तेः ॥ सप्तव्यतीयुस्त्रिगुणानितस्यदिनानिदीनोद्धरणोचितस्य ॥ २५ ॥

तीया ॥ २४ ॥ इत्थमिति ॥ इत्थमनेनप्रकारेणप्रजार्थंसंतानायमहिष्यासमंअभिषिक्तपत्न्यास
ह ॥ कृताभिषेकामहिषीत्यमरः ॥ व्रतंपालयतः धरयतः महनीयापूज्याकीर्तिर्यस्यदीनाना
मुद्धरणेविमोचनेउचितस्यतस्यनृपत्रसप्तगुणाआवृत्तयोयेषांतानित्रिगुणानित्रिरावृत्तानिसप्त
दिनानिएकविंशतिदिनानिव्यतीयुः ॥ २५ ॥ अन्येद्युरिति ॥ अन्येद्युः अन्यस्मिन्दिनेह्यावि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰वं॰ टि॰
९

शतिदिने ॥ सद्यः परुत्वरादित्याद्दिनानि पातनात्स्व्ययं ॥ अन्यान्हाद्यथ पूर्वेद्युरित्या
दौ पूर्वेचिरापयत् तथाधरात्सात्यतरे न राल्पूर्वेद्युरादयइत्यमरः ॥ मुनिहोमधेनुरात्मा
नुचरस्य नृपस्य भावं अभिप्रायं दृढभक्तित्वं ॥ भावाभिप्राय आशय इतियादवः जिज्ञा
समानाज्ञातुमिच्छंती ॥ ज्ञाश्रुस्मृदृशां सन इत्यात्मनेपदेशानच् ॥ प्रपसस्मिन्निति प्र

अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः ॥ गंगाप्रपातांतवि
रूढशष्पं गौरीगुरोर्गह्वरमाविवेश ॥ २६ ॥ साधुः प्रधर्षा मनसापि हिंस्रैरित्य
द्रिशोभाप्रहितेक्षणेन ॥ अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां च
कर्ष ॥ २७

पातः तस्यांते समीपे विरूढानि जातानि शष्पाणि बालतृणानि यस्मिन् तत् । श
ष्पं बालतृणं घास इत्यमरः ॥ गौरीगुरोः पार्वतीपितुः गह्वरं गुहां आविवेश प्रविवेश ॥ २६ ॥ ९
सेति ॥ साधेनुः हिंस्रैः व्याघ्रादिभिर्मनसादिभिमतसापिदुः प्रधर्षेति हेतोरद्रिशोभा
यां प्रहितेक्षणेन दत्तदृष्टिना नृपेण अलक्षितमभ्युत्पतनमाभिमुख्येन उत्पतनं यस्य सः सिं
हः तां धेनुं प्रद्रसत्यहठात् प्रसह्य तु हठार्थकमित्यमरः ॥ चकर्ष किलेत्यलीके ॥ २७ ॥ ॥

तृतीयमिति ॥ गुहानिबद्धेन प्रतिशब्देन प्रतिध्वनिना दीर्घं तस्याः इदं तदीयं आक्रंदितं ।
आर्तघोषणं ॥ आर्तः शब्दं पंनेषुसा द्योर्हितकारिणो नृपस्य नगेंद्रसक्तां दृष्टिं रश्मिषु प्र
ग्रहेषु । किरणप्रग्रहौ रश्मी इत्यमरः ॥ ओदाएवगृह्णात्विव निवर्तयामास ॥ २८ ॥ सइति ॥
धनुर्धरः । स नृपः पाटलायां रक्तवर्णायां गवि तस्थिवांसं संस्थितं । केसरिश्वेति केसरः प्रसव्यः

तदीयमाक्रंदितमार्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घं ॥ रश्मिष्विवादाय नगेंद्रसक्तां नि
वर्तयामास नृपस्य दृष्टिं ॥ २८ ॥ स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं दद
र्श ॥ अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लं ॥ २९ ॥ ॥

केसरिणं सिंहं सानुमतो द्रेर्धातोर्गैरिकस्य विकारो धातुमयी तस्यामधित्यकायां ऊर्ध्वभूमौ ॥
उत्पत्त्यकाले द्रेरासन्ना भूमिरूर्ध्वमधित्यकेत्यमरः ॥ उपाधिभ्यां ॥ सकंमासंनारूढयोरित्य
कन्प्रत्ययः ॥ प्रफुल्लो विकसितः नं फुल्ल विकसन इति धातोः पचाद्यच् लोध्राख्यं द्रुम
मिव ददर्श प्रफुल्लतमितितकारपाठेपि फला विशरण इति धातोः क्तप्रत्यये तेरिन्तः ॥ उत्पर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर॰ द्वि॰ स्यास्युकारादश॥२९॥ ततइति॥ ततः सिंहदर्शनानंतरंमृगेंद्रगामीसिंहगामीशरण्योरक्ष
१० णे॥शरणंगृहरक्षित्रोरित्यमरः॥शरणंरक्षणेगृहेइतियादवः।शरणेसाधुः।शरण्यः
तत्रसाधुरितियत्प्रत्ययः॥प्रसभेनबलात्कारेणउद्धृतारयोयेननृपतिःराजाजा
ताभिषंगोजातपराभवःसन्॥अभिषंगःपराभवइत्यमरः॥वध्यस्यवधार्हस्यडंद्रादि

ततोमृगेंद्रस्यमृगेंद्रगामीवधायवध्यस्यशरंशरण्यः॥जाताभिषंगोनृपतिर्निषं
गादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः॥३०॥वामेतरस्तस्यकरःप्रहर्तुर्नखप्रभाभूषित
कंकपत्रे॥सक्तांगुलिःसायकपुंखएवचित्रार्पितारंभइवावतस्थे॥३१॥ ॥

भ्योयदितियत्प्रत्ययः॥मृगेंद्रवामंशरीरंसव्यंस्यादपसव्यंतुदक्षिणमित्यमरः॥वधाय
निषंगात्तूणीरात्तूणोपासंगतूणीरनिषंगाइषुधिर्द्वयोरित्यमरः॥शरमुद्धर्तु
मैच्छत्॥वामेति॥प्रहर्तुःतस्यवामेतरःदक्षिणःकरोनखप्रभाभिराभूषितानिच्छु १०
रितानिकंकस्यपक्षिविशेषस्यपत्राणियस्यतस्मिन्॥कंकःपक्षिविशेषेस्यात्कुला

लारेयुधिष्ठिरेइतिविश्वः कंकस्तुकर्कटइतियादवः।सायकस्यपुंखएवकर्तर्यात्मख्ये
मूलप्रदेशे॥कर्तरीपुंखइतियादवः॥सक्तांगुलिसः।चित्रार्पितारंभः चित्रलिखि
तशरोद्धरणोद्योगइवावतस्थे॥३१॥बाह्विति॥बाहोप्रतिष्टंभेनप्रतिबंधेनविरुद्ध
मन्युःवृद्धरोषोराजामंत्रौषधिभ्यांरुद्धवीर्यः॥प्रतिबद्धशक्तिः॥भोगीसर्पइव॥

बाहुप्रतिष्टंभविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः॥राजास्वतेजोभिरद
ह्यतांतर्भोगीवमंत्रौषधिरुद्धवीर्यः॥३२॥तमार्यगृह्यंनिगृहीतधेनुर्मनुष्यवा
चामनुवंशकेतुं॥विस्मापयन्विस्मितमात्मवृत्तौसिंहोरुसत्वोनिजगादसिंहः॥३३॥

भोगीराजाभुजंगवोरित्तिशाश्वतः॥अभ्यर्णमासन्नमागस्कृतमपराधकारिणं॥अस्पृशद्
भिःस्वतेजोभिरंतरदह्यत॥अधिक्षेपाद्यसहनंतेजःप्राणात्ययेप्यपीतियादवः॥३२॥
तमिति॥निगृहीतापीडिताधेनुर्येनसःसिंहः आर्याणांसतांगृह्यंपक्ष्य॥पदास्वैरिबाह्यापक्ष्ये
ष्वचेतिक्यप्॥मनुवंशस्यकेतुंचिन्हंकेतुःपताकावत्केतुंभूपालेषुसिंहरूपउरुसत्वोमहाबल
स्तंआत्मनोवृत्तौबाहुस्तंभरूपेव्यापारेअभूतपूर्वत्वाद्विस्मितंवृत्तेरिक्तः नंदिलीपमनुष्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाचाकरणेनपुनर्विस्मापयन् विस्मयंआश्चर्यंमापयन्निजगाद। स्मिङ् ईषद्धसनेइति
धातोर्णिचिरुहोअयादेशेशतृप्रत्ययेच॥ सतिविस्मापयन्नितिरूपंसिद्धं। विस्मापयन्नि
तिपाठेपुगागममात्रंवक्तव्यं॥ तच्चिंत्यं। स्मयतेरितिहेतुभयंविवक्षामेवेतिभीस्म्यो
र्हेतुभयइतिआत्मनेविस्मापयमानइतिस्यात्॥ तस्मान्मनुष्यवाचाविस्मापयन्नि

अलंमहीपालतवश्रमेणप्रयुक्तमप्यस्त्रमितोवृथास्यात्॥ नपा
दपोन्मूलनशक्तिरंहः शिलोच्चयेमूर्छतिमारुतस्य॥ ३४॥ ॥

तिरूपंसिद्धंकरणविवक्षायांनकश्चिद्दोषः॥३३॥ ॥अलमिति॥ हेमहिपालतव
श्रमेणआयासेनअलंपर्याप्तंमांप्रत्यस्त्रग्रहणेमश्रमोनकार्यइत्यर्थः॥ साध्याभावा
च्छ्रमोनकार्यइत्यर्थः॥ अत्रगम्यमानसाधनक्रियापेक्षायांतृतीयाकरणत्वात्॥ तृती ११
या॥ उक्तं।च। नोसौध्योतेनकेवलश्रमेणैवक्रियानिमित्तंकरणभावस्यापितद्दिंगस्यमा
नंप्रति॥ अलंभूषणपर्याप्तिशक्तिवारणवाचकमित्यमरः किमितिश्रमोनकार्यइतामि

त्यमाह। किमितिनत्कृपातरत्याह॥ इतः अस्मन्मत्तः॥ सार्वविभक्तिकस्तसुःप्रयुक्तंप्रक्षि
प्तमप्यस्त्रंवृथानिष्फलंस्यात्॥ भवेत्। असभुविलिङ्। प्रभुत्वसाबल्यसामर्थ्यानिर्जि
तमित्यमाह॥ मत्प्रेरितास्त्रेणबहवोनिहताइत्यत्राह। तथाहि॥ पादपानांवृक्षाणांउन्मू
लनंउत्पाटनंतस्मिन्शक्तिसामर्थ्यंयस्यसतत्तथोक्तंमारुतस्यवायोःरंहोवेगःशिलोच्चये
अद्रौनमूर्छतिनप्रगल्भेनप्रसरतीत्यर्थः॥ मूर्छामोहसमुच्छ्राययोरितिधातोः अद्रेरुन्मूलनशक्तो

कैलासगौरंवृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठं॥ अवेहिमांकिंकरम
ष्टमूर्तेः कुंभोदरंनामनिकुंभतुल्यं॥ ३५॥ ॥ श्रीरामजयरामजय

वृद्धिंनलभतइतितात्पर्यार्थः॥३४॥ कैलासेति॥ भोराजन्कैलासवद्गौरंशुभ्रंवृषबलिव
र्धमारुरुक्षोरारोढुमिच्छोरष्टौमूर्तयोयस्यतस्यअष्टमूर्तेःशिवस्यार्कचंद्रमसः सोमयाजी
चेत्यष्टमूर्तयइतियादवः॥ पादार्पणंपादन्यासः॥ तदेवानुग्रहः प्रसत्तिस्तेनपूतंशुद्धं
पृष्ठंयस्यसतं॥ ईशोमेपृष्ठेचरणंन्यस्यवृषमारोहतीतिभावः॥ निकुंभोगणभेदः॥ कुंभ
कर्णपुत्रस्तत्समंकुंभोदरंनामकिंकरंभृत्यं॥ अवेहिजानीहि॥ अयेहीत्यत्रपररूपंनवृद्धिः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शर्मीकरस्पृष्टं च गोरमाकुर्मनीषिणः ॥ अवनिश्च तथा वायुर्यजमानजलाग्नयः ॥ सूर्य
श्चन्द्रमश्चैता अष्टौ शंकरमूर्तयः ॥ ३५ ॥ अत्र स्थितो सिंहत्वे च हेतुमाह ॥ अनुमितिः ॥
सोन्तपयामं देवदारुं पुरोग्रे पश्यसीति काकुः ॥ असौ देवदारुर्वृषभो ध्वजो यस्य तेन शि
वेन पुत्रीकृतः ॥ पुत्रभावं नीतः पुत्रत्वेन स्वीकृत इत्यर्थः ॥ अभूततद्भावे च्विः ॥ कथमि
त्यत्राह ॥ यो देवदारुः स्कंदस्य मातुः गौर्या हेम्नः कुंभा एव स्तनौ ताभ्यां निर्गतानां पयसां

अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोसौ वृषभध्वजेन ॥ यो हेम
कुंभस्तननिस्रुतानां स्कंदस्य मातुः पयसां रसज्ञः ॥ ३६ ॥

पानीयानां रसं जानातीति रसज्ञः स्वादज्ञः कुंदपक्षे हेमकुंभाविव स्तनाविति विग्रहः ॥
पयसां क्षीराणां । पयः क्षीरं पयोंबु चेत्यमरः ॥ पुत्रोपि स्तननिर्गतक्षीररसज्ञः स्यात् । उ
दकदानादिना तथा वर्धित इत्यर्थः ॥ स्कंदमातृग्रहणेन कार्तिकेयसाम्यं । स्कंदसमानप्रेमा
स्पदमिति भावः ॥ अर्धर्चादिपाठाद् अर्धर्चाः पुंसि चेति देवदारोः पुस्त्वमप्रियवादिवृशरा
स्फैर्देवदारवरति ॥ ३६ ॥ ॥ कंडूयेति ॥ कटं कपोलं । कटस्त्रोणौ क्रियाकारे कलिंजेतिश

येशवे ॥ समंयेगजगंडेचपिपल्यांचकटीमनेतिविश्वः ॥ कंडूयमानेन घर्षता । कंड्वादिभ्यो
यक् । ततः शानच् । वनेसाधुः । वन्यः स चासौ द्विपश्चेति केनचिदस्य देवदारोः । त्वक् वल्क
लं उन्मथितोन्मूलिता ॥ अथ त्वगुन्मथनानंतरं अद्रेस्तनया गौरी । असुरास्त्रैर्दैत्यप्रहरणै
रालीढं स्कंदमिवास्मिन्नित्यर्थः ॥ सेनां नयतीति सेनानीः ॥ स्कंदः सत्कद्विषस्यादिनाक्विप् ॥ एरने
काचयेण पार्वतीनंदनः स्कंदः सेनानीरित्यमरः ॥ तमिव एनं देवदारुं सुशोच । शुचेः स

अथैनमद्रेस्तनया सुशोच सेनान्यमालीढमिवासुरास्त्रैः ॥ तदाप्र
भृत्येव कंडूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य ३७ ॥

कर्मकर्तृत्वं तु प्रयोगात् ॥ रुदेः रुपारुरुदे वनदृपतंग इति भट्टिप्रयोगवदापूर्वत्वात् कर्मकर्तृत्व
मिति कश्चित् ॥ ३७ ॥ तदेति ॥ तदा तत्कालः प्रभृतिरादिर्यस्मिन् कर्मणि तद्यथा तथा तदाप्रभृ
त्येव तत् आरभ्यैव वनद्विपानां वनवासिनां गजानां त्रासार्थं भयार्थं भूतलभ्रता शंभुना अंकं
समीपमागताः प्राप्ताः सत्वाः प्राणिनो वृत्तिर्जीवितं यस्मिन् तत् । अंकः समीपउत्संगे चि
ह्नेस्थानापराधयोरिति केशवः ॥ सिंहत्वं व्याघ्ररूपत्वं वि भाषायास्मिन्नद्रिकुक्षौ गुहायां अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र. स. टि.
१३

हव्यापारितोनियुक्तः॥सिंहेनगजः भीष्यंतइतिसिंहत्वं स्तमित्यर्थः॥३८॥ परमेश्वरेणप्र
दिष्टोनिर्दिष्टः कालोभोजनवेलामहाकालेयमेभक्ष्यौकालः समयतृष्णयोरितिशाश्वतः
मतिबायस्यासाउपस्थिताप्राप्तएषागोरूपाशोणितपारणाभोजनंसुरद्विषः॥ राहोश्चं
द्रमसइयंचान्द्रमसीइंदुसंबधिनीसुधेवअमृतमिवक्षुधितस्यबुभुक्षितस्यमेममतृ

तदाप्रभृत्येववनद्विपानांत्रासार्थमस्मिन्नहमद्रिकुक्षौ॥ व्यापा
रितः शूलभृताविधायसिंहत्वमंकागतसत्ववृत्ति॥३८॥तस्या
लमेषाक्षुधितस्यतृप्त्यैप्रदिष्टकालापरमेश्वरेण॥उपस्थिताशोणि
तपारणामेसुरद्विषश्चांद्रमसीसुधेव॥३९॥ श्रीरामजमरा

स्यैअलंपर्याप्ता॥मनस्वीत्यादिनाचतुर्थ३॥उपोषितस्यभोजनंपारणेतिउपवासध्वनिः। १३
भोजनहेतुत्वाद्गौरेवपारणादिमसुरितिकश्चित्॥३९॥सइति। [illegible]
[illegible] सएवंरूपामस्मन्यस्त्वंलज्जांविहायस्मात्निवर्तस्वप्रत्यागच्छ॥य
तोभवान्। गुरोः दर्शिताप्रकाशिताशिष्यभक्तिः॥शिष्यकर्तव्यभक्तिर्येनसतथोक्तो

स्तिइत्यनेनापराधपरिहारः॥गुरोर्धेनुं विनश्वरीकपेश्स्याकीर्तिमाकथंयामीत्याशंक्या
ह॥शस्त्रेणेति॥यद्रक्ष्यंरक्षायोग्यंवस्तुशस्त्रेणायुधेन॥शस्त्रमायधलोहयोरित्य
मरः॥अशक्यारक्षायस्यतत्॥अशक्यरक्षंरक्षितुमशक्यमित्यर्थः॥ तद्रक्ष्यंनष्टमपि
शस्त्रभृतामशस्त्रधारिणांयशोनक्षिणोति॥ नहिनस्ति॥अशक्यार्थेषुप्रतिविधानं

सत्वंनिवर्तस्वविहायलज्जांगुरोर्भवान्दर्शितशिष्यभक्तिः॥शस्त्रे
णरक्ष्यंयदशक्यरक्षंनतद्यशः शस्त्रभृतांक्षिणोति॥४०॥

नदोषायेतिभावः॥क्षिहिंसायामितिभौवादिकस्यप्रयोगः॥तानादिकस्यपाणिन्याचा
र्यमतेउविकरणस्यगुणित्वात्॥संज्ञापूर्वकत्वेनगुणोनास्तीतिविस्तरेणुकरोतेः संबंधिनु
विकरणगुणइतितस्मेतिसमर्थोदिस्यारोगणाशोधनेपिइत्वाकारस्यैवोपलक्षण
त्वात्क्षिणोत्यत्रनगुणः॥शस्त्रभृतामितिसाभिप्रायः॥४०॥ ॥इतीति॥पुरुषाणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मधिराजोमृगाधिराजस्यवचोनिशम्यनृपतिः॥इतिप्रगल्भंप्रतिभाषितं॥प्रज्ञानवो
ध्यासशालिनीप्रतिभामतेतिमादवः॥चतुरंमृगाधिराजस्यसिंहस्यवचोनिशम्यस्तु
चागिरिरस्यास्तीतिलोमादित्वाल्लुःगिरिंशयतिउपभोगेनततन्करोति॥शोतनूकरणे
इत्यस्माद्धातोरातोनुपसर्गेकः॥गिरौश्छंदसीतिकृयदसाअपिभाषाप्रयायुज्यंते॥अ
सुस्तुक्षणिवदंतिक्षीरस्वामिनोक्तत्वात्गिरिशःईश्वरःतस्यप्रभावेनमाहात्म्येनप्रसा

इतिप्रगल्भंपुरुषाधिराज्यमृगाधिराजस्यवचोनिशम्य॥प्रत्या
हतास्त्रोगिरिशप्रभावादात्मन्यवज्ञांशिथिलीचकार॥४१॥

हतत्वास्त्रःकुंठितशस्त्रःसन्आत्मनिस्वस्मिन्विषयेअवज्ञं॥अपमानंसमीक्षामप्य
रीतिवारयितुमसउर्थस्यवंरूपांशिथिलीचकारातत्याजेत्यर्थः॥अन्नभूततद्भावेविः १४
चोवेत्तिदीर्घःननुजासेसर्थः॥अवज्ञातोहमितिनिर्वेदनंप्रापेत्यर्थः॥समानेपुरस्स
त्रियाणाममिमानेनसर्वेश्वरप्रतीतिभावः॥४१॥प्रतीति॥ ॥सएवपूर्वःप्रथ

मःसंगःप्रतिबंधोयस्यतस्मिन्तत्पूर्वसंगेषुप्रयोगेवितथप्रयत्नाविफलप्रयासःअ
तएववज्रंकुलिशंमुमुक्षन्॥मोक्तुमिच्छन्अंबकंलोचनंदृक्दृष्टिलोचननेत्रचक्षुरीया
नांचक्षेपणाक्षणीनिहलायुधःत्राणिअंबकानियस्यसत्र्यंबकोहरस्तस्यवीक्षितेनवीक्ष
णेनजडीहतःनिष्पंदीकृतःवज्रंपाणौयस्यसवज्रपाणिरिंद्रः॥प्रहर्तपार्थस्यःपरेनिष्ठा

प्रत्यब्रवीच्चैनमिषुप्रयोगेतत्पूर्वसंगेवितथप्रयत्नः॥जडी
कृतस्त्र्यंबकवीक्षितेनवज्रंमुमुक्षन्निववज्रपाणिः॥४२॥

सप्तम्योभवतइतिवक्तव्यंइतिपाणेःसप्तम्यस्याततरविपातः॥सद्वस्थितःनृपःएनं
सिंहप्रत्यब्रवीत्॥चकारःप्रथमश्लोकापेक्षःशिथिलीचकारेत्यनेनसमुच्चयः॥प्र
त्याहेतिपाठः॥प्रत्युवाचेत्यर्थोन्वयं॥बाहुंसवज्रंशक्रस्यक्रुद्धस्यास्तंभयत्प्रभुरिति
महाभारते॥४२॥ ॥संरुध्येति॥भोमृगेंद्रसिंहसंरुद्धचेष्टस्यप्रतिपक्षव्यापार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यममनद्वच: मद्वाक्यंकामंदास्यंपरिहासनीयंयद्वच: सत्वंमदीयेनेत्यादिकंअहंवि
वक्षु: वक्तुमिच्छुरस्मि। तर्हित्तूष्णीस्थीयतामत्याशंकईश्वरकिंकरत्वात्सर्वज्ञत्वानह्य
स्यामित्याह ॥ अंतरिति ॥ हियत: भवान्प्राणभृतांअंतर्गतंहृत्गतंवाग्वृत्त्याबहिर
प्रकाशितमेवसर्वंभावंवेदयेत्सि। विदोलयचेतिलटादेश: । अतोभिधास्येतद्यद्वचो

स्मयदेह

संरुध्यचेष्टस्यमृगेंद्रकामंहास्यंवचस्यद्यदहंविवक्षु: ॥
अंतर्गतंप्राणभृतांहिवेदसर्वंभवान्भावमतोभिधास्ये ॥४३॥

अहंविविक्षुरित्यर्थ: ॥ वक्ष्यामिवचइत्तिप्रकृतंकर्मसंबध्यते ॥ अन्येत्वीदृग्विधाना १९
कर्ण्यसंभावनार्थमेतदित्युपसंहरति ॥ अतस्तूष्णींमेवभूषणंत्वंतुवाङ्मनसेरि
कविधएवयमितिजानासिअतोभिधायद्वाचं ॥ अहंविवक्षुरित्यर्थ: ॥४३॥ ॥
मान्यमिति ॥ प्रसवहार: प्रलय: ॥ स्थावराणांतरुशैलादिनांजंगमानांमानुषादि

नांसर्गस्थितिप्रत्यवहारेषुहेतु: सईश्वरोमेमान्य: पूज्य: अलंघ्यशासनंइत्यर्थ: ॥ शा
सनंवसित्वमंकागतसत्वरत्तीसुरूपं ॥ तर्हिविसृज्यंगम्यतामितिनेत्याहगुरोरिति
पुरस्तादग्रेनश्यदिदंआहितोग्नेर्गुरोर्धनमपिगोरूपंअनुपेक्षणीयंआहिताग्नेरितिवि
शेषणेनअनुपेक्षाकारणंहवि: साधनत्वंसूचयति ॥४४॥ सत्वमिति ॥ सांकागतस्सत

मान्य: समेस्थावरजंगमानांसर्गस्थितिप्रत्यवहारहेतु: ॥ गुरोरपीदंधनमाहि
ताग्नेनश्यत्पुरस्तादनुपेक्षणीयं ॥४४॥ सत्वंमदीयेनशरीरवृत्तिंदेहेननिर्वर्तयि
तुंप्रसीद ॥ दिनावसानोत्सुकबालवत्साविसृज्यतांधेनुरियंमहर्षे: ॥ ४५॥

वृत्तिस्त्वमदीयेनदेहेनशरीरवृत्तिस्त्वंमदीयेनदेहेनशरीरवृत्तिंजीवनं ॥ निवर्तयितुंसंपा
दयितुंप्रसीद। दिनावसानोत्सुकोमातागमिष्यतीत्युत्कंठितबालवत्सोस्या:
सामवर्षेरियंधेनुर्विसृज्यतां। हानांचेवरवानविलेगुहेस्समरं ज्यतां॥४५॥ अथेति। अथ
भूतेश्वरपार्श्ववर्ती अनुचर: सिंह: गिरिगराणांगुहानांचेनरवानविलेगुहेस्समर: ॥

र॰ द्वि॰ स॰
१६

अंधकारध्वांतं दृष्ट्योर्मयूखैरेव शकलानि कुर्वन्निरस्यन्नित्यर्थः। किंचिद्धिंहस्यार्थ
पतितः भयोवभाषे हासे कारणं अल्पस्यहेतोर्बहुहातुमिच्छन्नित्यादि वक्ष्यमाणं दृष्टव्यं
॥ ४५॥ एकातपत्रमिति॥ एकातपत्रं एकछत्रं॥ जगतः प्रभुत्वं॥ नवं वयो यौवनं दंष्ट्र
कांतं रम्यं वपुश्चेसर्वंबहु॥ अल्पस्यहेतोरल्पेनकारणेन अल्पफलायेत्यर्थः॥ षष्ठीहे

अथांधकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन्॥ भूयः स भूतेश्वर
पार्श्ववर्ती किंचिद्विहस्यार्थपतिं बभाषे॥ ४७॥ एकातपत्रं जगतः प्रभुत्वं
नवं वयः कांतमिदं वपुश्च॥ अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभा
सि मे त्वं॥ ४७॥

तुः प्रयोगइतिषष्ठी॥ हातुं सत्कुमिच्छंस्त्वं॥ ममामि विवाहे कार्याकार्य १६
विमर्शमूढो मंदः प्रतिभासि॥ ४७॥ भूतेति॥ तव भूतेष्वनुकंपा दयाचेत् कृपा दया
नुकंपास्यादित्यमरः॥ कृपैव वर्ततेचेदित्यर्थः॥ तर्हित्वदंतेन तवविनाशेसति॥ इयमे

तमिति। अस्य संगतं कर्तव्यः। तदिलीपं धेनुरुवाच॥ किमित्यत्राह॥ हेसाधो मायामुत्पा
द्यकृत्स्वं इति परिक्षितोसिमया॥ ऋषिप्रभावात् कोपिमयि प्रहर्तुं न प्रभुः नसमर्थः॥ अस्या
हिंस्राः घातुकाः शरारुर्घातुकोहिंस्र इत्यमरः। तमिकं पासादिना रप्रसव्यः॥ किमुतकिमुत न
व्यं॥ कष्टुनप्रसवतेइतिमोत्यं॥ बलवत्सष्टु किमुतस्रवतीत्यत्रनिर्भरइत्यमरः॥ ६२॥ भक्त्या॥

तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परिक्षितोसि॥ ऋषिप्रभावान्मयि नांतकोपि
प्रभुः प्रहर्तुं किमुतान्यहिंस्राः॥ ६२॥ भक्त्या गुरौ मय्यनुकंपया च प्रीतास्मि ते वत्स वरं वृ
णीष्व॥ न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नां॥ ६३॥ श्रीरामाय

हे वत्स गुरौ भक्त्या मय्यनुकंपया च तेन त्वयं प्रीतास्मि। त्वया प्रहरणमर्पा कर्तव्यमिति च तत्परः॥ वरं
हे वेष्यावरणा मम यद्दैवादत्ते वर श्रेष्ठे त्रिषु क्लीवमनाक्प्रियइत्यमरः॥ वृणीष्व। स्वकुरुष्व॥
तथाहि॥ मां केवलानां पयसां प्रसूतिकारणं न अवेहि नविद्धि॥ किंतु प्रसन्नां कामदोग्ध्रीं वि
कामदुघातामवेहि॥ इहकूपघनश्चवत्ति कृप्रसयः॥ ६३॥ ततस्तमानियेतितनंदनस्तदंतरं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰ द्वि॰ स॰
२१

मानिनाथ॥ स्वहस्तार्जितो विरशब्दो येन सः॥ एवं नद्याहत्यदैन्यपरिहारित्वं सूचितं॥
स राजा हस्तौ समानिसंवय्य संयोज्य अंजलिं बध्वा इत्यर्थः॥ सुदक्षिणायां धर्मपत्न्यां वं
शस्य कर्तारं प्रवर्तयितारं रघुकुलमिति प्रसिद्धं अनंतकीर्तिः स्थिरयशाः तेन तनयं ययाचे
॥६४॥ संतानकामायेति॥ सा पयस्विनी गौः संतानकामाय ते इति संतानकामाः कर्मण्य

ततः समानीय समानिनाथ हस्तौ स्वहस्तार्जितवीरशब्दः॥ वंशस्य कर्तारमनं
तकीर्तिं सुदक्षिणायां तनयं ययाचे॥६४॥ संतानकामाय तथेति कामं राज्ञे प्रति
श्रुत्य पयस्विनी सा॥ दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुंक्ष्वेति तमादिदेश॥३५॥

ण्॥ तस्मै राज्ञे तथेति कामं इति कामो वर॥ कामार्थे घञ्॥ तं प्रतिश्रुत्य प्रतिज्ञाय हे पुत्र मदीयं
पयः पत्रपुटं पत्रनिर्मितपात्रे दुग्ध्वा उपभुंक्ष्वेति पिबेति॥ उपभुंक्ष्वेति पाठः॥ तमादि २१
देश॥ अज्ञापितवृत्ती॥६५॥ वत्सेति॥ हे मातः॥ वत्सस्य वत्सनिपीतस्य शेषं पीतावशिष्टं इ
त्यर्थः॥ होम एवार्थः स्तस्य विधिरनुष्ठानं तस्य शेषं उधसेन च औधस्यं। शरीरावयवाच्चेति
यत्प्रत्ययः॥ रक्षितायाः उर्व्याः षष्ठांशमिव षष्ठभागमिव छिवगुरोरनुज्ञामधिगम्य उपभोक्तुं

यातुमिच्छमिच्छामि॥६६॥ इत्थमिति॥ इत्थं क्षितीशेन विज्ञापिता वशिष्टधेनुः प्रीततरा॥
पूर्वं शुश्रूषया प्रीता तां प्रति विज्ञापनया प्रीततरा॥ अतिसंतुष्टा बभूव॥ तेन दिलीपेन चीना हि
मवतः संबंधिनः कुक्षौ गुहायाः सकाशात् आश्रमेण अश्रमं प्रयासाय यो आगता॥६७॥ तस्याः

वत्सस्य होमार्थविधेश्च शेषं गुरोरनुज्ञामधिगम्य मातः॥ औधस्यमिच्छामि तवोप
भोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः॥६६॥ इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापि
ता प्रीततरा बभूव॥ तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण।
॥६७॥ तस्याः प्रसन्नेंदुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य॥ प्रहर्षचिन्हा
नुमितं प्रियायै शशंस वाचा पुनरुक्तयेव॥ ६८॥ श्रीरामजयरामजय

इति। प्रसन्नेंदुरिव रवंसस्य स नृपः नृपाणां गुरुः दिलिपः प्रहर्षचिन्हैः मुखप्रसादादिभिः अनुमि
तं अभ्यूहितं तस्याः धेनोः प्रसादं अनुग्रह प्रहर्षचिन्हैरेव ज्ञातपुनरुक्तयेव वाचा गुरवे विज्ञाप्य
पश्चात्॥ प्रियायै सुदक्षिणायै शशंस कथयामास॥ कथितस्य कथं पुनरुक्तिः न चैव हृ
दस्ति किंतु चिन्हैः कथितप्रायत्वात् पुनरुक्तमिव स्थितमित्युत्प्रेक्षा॥६८॥ सहेति॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र· द्वि· स·
२२

अनिंदितात्मा अगर्हितस्वभावः ॥ स सद्वत्सलः प्रेमवान् ॥ सद्वत्सलः । पत्रासाभ्यां
कामवलेइतिलघुप्रत्ययः ॥ वसिष्ठेन कृताभ्यनुज्ञः कृतानुमतिः सन् ॥ वत्सस्य हुतस्य
चावशेषंपीनहतावसिष्ठनंदिन्याः स्तन्यं क्षीरंशुभ्रंमूर्तंपरिच्छिन्नंयशइव अतितृ
ष्णः सस्पृहयपौ ॥ ६९ ॥ प्रातरिति ॥ वसिष्ठः प्रातर्यथोक्तस्यव्रतस्यगोसेवारूपस्यपारणा

सनंदिनीस्तंन्यमनिंदितात्मासद्वत्सलोवत्सनिपीतशेषं ॥ पपौवसिष्ठेनकृताभ्यनु
ज्ञः शुभ्रंयशोमूर्तमिवातितृष्णः ॥ ६९ ॥ प्रातर्यथोक्तव्रतपारणांतेप्रास्थानिकंस्व
स्त्ययनंप्रयुज्य ॥ तौदंपतीस्वांप्रतिराजधानींसंप्रेषयामासवशीवसिष्ठः ॥ ७० ॥

तस्याः अंते प्रास्थानिकं प्रस्थानकाले भवंतत्कालोचितंइत्यर्थः ॥ कालात्ठ्यइतिठञ् ॥ [illegible] ॥ 22
कथंचित्गुणावसाकालेवानीमानत्साप्रत्ययइतिहन्तिकारः ॥ स्वस्तिइत्यतप्राप्यते येन
तिस्वस्त्ययनं [illegible] मायहमाशीर्वादंप्रयुज्यतौदंपतीसुदक्षिणादिलीपौस्वांराजधानींप्र
तिप्रतिप्रस्थापयामास ॥ ७० ॥ प्रदक्षिणीकृत्येति ॥ नृपः हुतं हुतमस्यास्तीतिहुताशनः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=11.09.19 14:24
,TRANSFERRED=2019/09/11 at 14:28:29
,PAGES=16
,TYPE=STD
,NAME=S0001764
,Book Name=M-2191-RAGHUVANSHAM VITIYE
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection